विद्युद्दूतः

vidyud-dūtaḥ

क्रमाङ्कः प्रथमः

वसुधैव कुटुम्बकम्

१।४।२०१२

INTERNATIONAL ASSOCIATION of SANSKRIT STUDIES

Issue: First

अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

1|4|2012

कुटुम्बशास्त्रिविरचितः

शुभसन्देशः

भूमेः प्रतीच्यामथ दक्षिणस्यां
प्राच्यामुदीच्यां निजधीविभूतिम् ।
सन्तन्वती संस्कृतगीः पृथिव्यां
सौजन्यसौभ्रात्रकरी विभाति ।।१।।

“**अंरासं**" समवायकस्य महतो विश्वस्य कोणेषु
संव्याप्तस्याखिलसभ्यसम्मुखमसौ लेखार्थसंवाहकः ।
विद्युत्तीव्रगतिः सदस्यहृदये विद्युत्प्रसारावहः
विद्युद्दूतसुसंज्ञको विजयतामन्वर्थनामा चिरम् ।।२।।

---

विद्युद्दूतस्य अनुबन्धचतुष्टयम्

राधावल्लभः त्रिपाठी

पुरातनकाले कविभिः मेघदूतम्, पवनदूतम् इत्यादीनि दूतकाव्यानि विरचितानि। इदानीं विद्युद्दूतः आविर्भवति। मेघदूतादिषु मेघादयो नायकस्य नायिकाया वा दौत्यं कुर्वन्ति। अयं विद्युद्दूतः कस्य दौत्यं कुर्यात्? इदं संस्कृतस्य दौत्यं कुर्यादिति मन्यामहे। कथमिदं संस्कृतस्य दौत्यं कुर्यात् इति उच्यते संस्कृतस्य यः सन्देशः तस्य प्रसारणेन अयं संस्कृतस्य दौत्यं कुर्यात्।
अस्य तावत् संस्कृतसन्देशस्य अनुबन्धाः विचारणीयाः। तेनैव विद्युद्दूतस्यापि अनुबन्धविचारः सेत्स्येत।
तस्मात् संस्कृतसन्देशस्य विद्युद्दूतस्य वा अनुबन्धचतुष्टयं विचारयामः। अनुबन्धचतुष्टयं किम्? सुविदितमेतद् यत् अधिकारि-विषय-सम्बन्ध-प्रयोजनानि इति चतुष्टयी अनुबन्धचतुष्टयं भवति।
अतश्च विद्युद्दूतस्य अधिकारि-विषय-सम्बन्ध-प्रयोजनानि विचार्यन्ते।
समग्रे संसारे ये संस्कृतं प्रति रुचिशीलाः सन्ति, संस्कृतज्ञा वा भवन्ति ते अस्य अधिकारिणः। ते विद्वांसः स्युः अथवा जिज्ञासवः स्युः।
सर्वाणि शास्त्राणि संस्कृते नवानुसन्धानं नवप्रस्थानपरीवर्ताः सुसंस्कृतार्पितमतीनां मनोभावाः अस्य विषयाः स्युः। विषयाणामानन्त्ये सति अनवस्था अस्य विद्युद्दूतस्य भवेद् इति चेद् न। सम्पादकस्य विद्युदिव स्फुरन्ती सक्तुमिव तितउना पावयन्ती प्रज्ञा समुचितामेव सामग्रीं परिवेषयेत्।
अथ सम्बन्धः। संस्कृतभाषया सर्वेषां विषयाणां प्रतिपादनम्, तज्जन्यः विषयविद्युद्दूतयोः प्रतिपाद्यप्रतिपादकभाव एव अत्र सम्बन्धः। संस्कृतं नाम न केवलम् एका भाषा, सा शास्त्रपरम्पराणां वोढ्री वरीवर्ति। ताश्च शास्त्रपरम्परा विविधैरनुशासनैः विषयैः वा सम्बद्धाः। तेन परःसहस्त्रं विषयाणामनुशासनानां सम्बन्धः संस्कृतेन घटते। अयं विद्युद्दूतः संस्कृतस्य सन्देशं दिशि दिशि नयेत्, प्रचारयेद् वा। संस्कृतस्य सन्देशे तास्ताः शास्त्रपरम्पराः नानाविषयाः बहूनि वा अनुशासनानि समाविष्टानि। तेषां द्वारैः बहुविधाः सम्बन्धाः अस्य विद्युद्दूतस्य साध्येरन्। ये विषयाः संस्कृतसम्बद्धास्तेषां सर्वेषां सम्बन्धो विद्युद्दूतेन। विद्युद्दूतमाध्यमेन च तेषां सम्बन्धः समाजेन स्यात्।
अथ प्रयोजनम्। एकमेव प्रयोजनं तादृशं निर्धार्यम्, येन साधितेन सर्वं साध्येत। तर्हि संस्कृतमत्र प्रयोजनमिति वक्तुं युज्यते। तदनुषङ्गेन संस्कृतक्षेत्रे विधीयमानानि अनुसन्धानकार्याणि संस्कृतविदुषां नवीनाः अध्ययनानुशीलनप्रवृत्तयः संस्कृते विहिताः नवीनाश्च रचना – इति सर्वेषामेतेषां प्रकाशनं वैशिष्ट्याविष्करणं च विद्युद्दूतस्य प्रयोजनं स्यात्। बहवः संस्कृतविदः भारतेतरदेशेषु संस्कृतरचनाकर्माणि रुचिशीलाः सन्ति। यथा ज्ञायन्ते

कोरियाभिजनस्य बाक्-कन्बेवर्यस्य कथारत्नाकर-अमरुशतकलीला-प्रभृतयः काव्यकथादिप्रबन्धाः। यथा वा यवनशतकम् सुभाषितशतकं च कार्लकेपेलरवर्यस्य सुविदिते स्तः। नव्येषु फिन्लैण्डदेशवास्तव्यो मैंसब्रूवर्यो विज्ञायते संस्कृतरचनाकर्मनदीष्णः। अपरे पुनः शास्त्रविमर्शं संस्कृतेन सम्यक् कुर्वन्ति। तद्यथा जार्जकार्डोनाप्रभृतयः ज्येष्ठाः पण्डिताः परिष्कारपुरस्सरं सम्यक् संस्कृतेन शास्त्रीयान् विषयान् विवेचयन्ति।

वयं त्वेतन्मन्महे। अधिकारि-विषय-सम्बन्ध-प्रयोजनानां शास्त्रेषु निरूपितं स्वरूपमेव विद्युद्दूतम् आत्मनो दृष्टान्तेन विस्तारं गमयेत्। तेन संस्कृताधिकारिजनानां समाजस्य, संस्कृतान्तर्गतानां विषयाणां, संस्कृतस्य सम्बन्धानां प्रयोजनानां च सर्वेषामेवानुबन्धानां विस्तारो विद्युद्दूतेन साध्येतेति दिक्।

किं बहुना।

संवादाय विमर्शाय संस्कृतज्ञेषु वै मिथः ।  
शास्त्राणां च विकासाय नवोन्मेषाय भासितम् ।।१।।  
संस्कृतप्रभया ध्वान्तं दूरीकुर्वञ्च भूतले ।  
आलोकाय हि लोकानां विद्युद्दूतो भवेदलम् ।।२।।

इति विद्युद्दूतस्य प्रथमाङ्कः